नवायाम् ३भूमिपाटल्यां च राजनिघण्टुः ।

**रक्तपुष्पी** स्त्री रक्तानि पुष्पाण्यस्याः ङीप् । १पाटलिवृक्षे (पारुल) २जवायाम् ३आवर्त्तकीलतायाम् ४नागदमन्याम् ५करुणीवृक्षे ६चक्राकाण्ड्यां च राजनि० ।

**रक्तपूरक** न० रक्तं रुधिरं पूरयति सेवनात् पूर-ण्वुल् । वृक्षाम्ले राजनि० । [म्लाने च राजनि० ।

**रक्तप्रसव** पु० रक्तवर्णः प्रसवः पुष्पमस्य । १करवीरे २रक्ता

**रक्तफल** पु० रक्तानि फलान्यस्य ।१वटवृक्षे जटा० । २बिम्बिकायां (तेलाकुचा) स्त्री अमरः टाप् ।

**रक्तबालुक** न० कर्म०। सिन्दूरे हारा० रक्तबालुकाप्यत्र स्त्री

**रक्तमञ्जर** पु० रक्तवर्णा मञ्जरी अस्त्यस्य अच् । निचुलवृक्षे त्रिका० । [राजनि० ।

**रक्तमूला** स्त्री ६त०, लज्जालुलतायाम् । कप् । देवसर्षपे पु०

**रक्तमेह** पु० कर्म० । प्रमेहरोगभेदे "विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः" भावप्र० ।

**रक्तमोक्षण** न० ६त० । रुधिरस्रावणे ।
"वेदनोपशमार्थाय तथाऽपाकशमाय च । अचिरोत्पतिते शोथे शोणितस्रावणञ्चरेत्" । चरेत् कुर्य्यात् । "एकतस्तु क्रियाः सर्वा रक्तमोक्षणमेकतः । रक्तं हि वेदनामूलं तच्चेन्नास्ति नचापि रुक् । विवर्णे कठिने श्यावे व्रणे चात्यन्तवेदने । सविशेषे विशेषेण जलौकोभिः पदैरपि" । शोणितस्रावणञ्चरेदित्यनेनान्वयः" भावप्र०

**रक्तयष्टि** स्त्री रक्तवर्णा यष्टिरस्याः । मञ्जिष्ठायाम् जटा० । कप् । रक्तयष्टिका तत्रैव ।

**रक्तरेणु** पु० रक्ता रेणवोऽस्य । १पलाशकलिकायाम् २सिन्दूरे च मेदि० ३पुन्नागे राजनि० ।

**रक्तलशुन** न० कर्म० । (लालरशुन) मूलभेदे राजनि० ।

**रक्तला** स्त्री रक्तं रुधिरं हेतुत्वेनास्त्यस्याः लच् तत् लाति सेवनात् ला-क वा । काकजङ्घायाम् राजनि० ।

**रक्तवटी** स्त्री रक्तवर्णा वटीव । मसूरिकायाम् त्रिका० ।

**रक्तवर्ग** पु० रक्तानां वर्गः समुदायः । दाडिमकिंशुकलाक्षाबन्धूकहरिद्राद्वयजवाकुसुमपुष्पमञ्जिष्ठालक्तकरूपे समूहे राजनि० । [कर्म० । २रोहितरूपे पु० ३तद्वति त्रि०।

**रक्तवर्ण** पु० रक्तो वर्णोऽस्य । १इन्द्रगोपकीटभेदे राजनि० ।

**रक्तवर्द्धन** पु० रक्तं रुधिरं वर्द्धयति भोजनात् वृधणिच्-ल्यु । वार्त्ताकौ शब्दच० । [याम् राजनि० ।

**रक्तवर्षाभू** पु० वर्षायां भवति भू-क्विप् कर्म० । रक्तपुनर्नवा-

**रक्त(बी)वीज** पु० रक्तवर्णानि वी(बी)जान्यस्य । १दाडिमे राजनि० रक्तं रुधिरमेव वी(बी)जमुत्पत्तिः कारणं यस्य । "रक्तविन्दुर्यदा भूमौ पतत्यस्य शरीरतः । समुत्पतति मेदिन्यास्तत्प्रमाणस्तदाऽसुरः" देवीमा० उक्ते असुरभेदे [शब्दच०

**रक्तवृन्ता** स्त्री रक्तं वृन्तं यस्याः । शेफालिकायाम्

**रक्तवृष्टि** स्त्री ६त० । दैवकृतोपद्रवभेदे रुधिरवर्षणे "सत्यचिन्तामणौ "रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः । धान्यहिरण्यत्वक्फलकुसुमाद्ये वर्षिते भयं विद्यात्" ज्यो० त० । [शब्दे २८७६ पृ० दृश्यम् ।

**रक्तशालि** पु० कर्म० । (लालधान) धान्यभेदे भावप्र० । धान्य-

**रक्तशिग्रु** पु० कर्म० । (लालसजना) वृक्षभेदे राजनि० ।

**रक्तशीर्षक** पु० रक्तं शीर्षमस्य कप् । १सरलद्रुमे रत्नमा० । २रक्तमस्तके त्रि० ।

**रक्तशृङ्गिक** न० रक्तं शृङ्गमिवास्त्यस्य ठन् । विषभेदे राजनि०

**रक्तसन्ध्यक** न० रक्ता सन्ध्येव कन् । रक्तवर्णे कह्लारे अमरः

**रक्तसरोरुह** न० कर्म० । रक्तपद्मे अमरः ।

**रक्तसर्षप** पु० कर्म० । (राइसर्षा) राजिकायाम् राजनि० ।

**रक्तसहा** स्त्री रक्तं सहते सह-अच् । रक्तम्लाने राजनि० ।

**रक्तसार** न० रक्तः सारोऽस्य । १रक्तचन्दने २अम्लवेतसे पु० राजनि० ।

**रक्तसौगन्धिक** न० कर्म० । (नालसुदि) रक्तवर्णकह्लारे जटा०

**रक्ताकार** पु० रक्तवर्ण आकारो मूर्त्तिर्यस्य । १प्रवाले राजनि० २रक्तमूर्त्तिके त्रि० ।

**रक्ताक्ष** पु० रक्ते अक्षिणी यस्य षच्समा० । १पारावते २महिषे ३चकोरे राजनि० ४रक्तनेत्रवति क्रूरे जने च त्रि० ५सारसे च मेदि० । स्त्रियां जातौ सर्वत्र ङीष् ।

**रक्ताङ्ग** न० रक्तमङ्गं यस्य यस्माद्वा । १कुङ्कुमे २मङ्गलग्रहे ३कम्पिल्ले (डहरकरमचा) च पु० ४प्रवाले पुंन० मेदि० । ५जीवन्त्याम् ६मञ्जिष्ठायाञ्च स्त्री भावप्र० ङीप् ।

**रक्ताति(ती)सार** पु० रक्तमिश्रितोऽति(ती)सारः । वैद्यकप्रसिद्धे रोगभेदे । "पित्तकृत्तु यदात्यर्थं द्रव्यमश्नाति पैत्तिके । तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्वणः" भावप्र० । अति(ती)सारशब्दे १०६ पृ० दृश्यम् ।

**रक्ताधार** पु० ६त० । देहावरके चर्मणि राजनि० ।

**रक्तापह** न० रक्तं रुधिरमपहन्ति अप+हन-ड । मत्स्यरीबोले राजनि० ।

**रक्तापामार्ग** पु० कर्म० । (लाल आपाङ) क्षुपभेदे राजनि०

**रक्ताम्र** पु० नित्यक० । कोषाम्रे राजनि० ।